International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(2): 292-294
© 2026 IJMH
www.themultijournal.com
Received: 26-03-2026
Accepted: 17-04-2026
Publish : 18-04-2026

**दीपककुमारचौधरी**
शोधार्थी,स्नातकोत्तरव्याकरणविभागीय-अनुसन्धाता,कामेश्वर-सिंह-दरभङ्गा-संस्कृत-विश्वविद्यालयः,कामेश्वरनगरम्,दरभङ्गा, बिहारम्
पदम्-सहायक-अध्यापकः,संस्कृतम्
कार्यस्थलम्-राणा-संग्राम-सिंह-इण्टर-कालेज,बिसाहड़ा,गौतमबुद्धनगरम्, उत्तरप्रदेशः-२०१००८

**Correspondence:**
**दीपककुमारचौधरी**
शोधार्थी,स्नातकोत्तरव्याकरणविभागीय-अनुसन्धाता,कामेश्वर-सिंह-दरभङ्गा-संस्कृत-विश्वविद्यालयः,कामेश्वरनगरम्,दरभङ्गा, बिहारम्

# "उपसर्गाणां द्योतकत्वं वाचकत्वं वेति शब्दशास्त्रीयमनुशीलनम्"

**दीपककुमारचौधरी**

**"अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।**
**विवर्तते अर्थभावेन प्रक्रिया जगतो यतः।।"**
**(वाक्यपदीयम्,ब्रह्मकाण्डम्-१)**

इत्युपर्युक्तव्याकरणसम्प्रदाय-दार्शनिकग्रन्थरत्नभूत-वाक्यपदीय-वचनप्रामाण्याज्ज्ञायते यत्सर्वोऽपि लोकयात्रासम्पादको जागतिको व्यवहारः शब्दायतनः (शब्दायत्तः शब्दमूलो वा)।अत्र महाकवेर्दण्डिनो वचनमपि प्रमाणम्-

**"इह शिष्टानुशिष्टानां शिष्टानामपि सर्वथा।**
**वाचामेव प्रसादेन लोकयात्रा प्रवर्त्तते।।"**
**(काव्यादर्शः-१.३.४)**

अत्र वाक्पदेन शब्दोऽपि गृह्यते।कविकुलगुरुणा कालिदासेन रचितस्य रघुवंशमहाकाव्यस्य मङ्गलपद्यमप्यत्र प्रमाणभूतं वर्तते।तद्यथा-

**"वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।**
**जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥"**
**(रघुवंशमहाकाव्यम्-१.१)**

अत्रापि वाक्पदं शब्दपर्यायभूतमेव।रघुवंशमहाकाव्यस्य सञ्जीवनीव्याख्यायां महामहोपाध्यायेन आचार्यमल्लिनाथसूरिणा
तदित्थं प्रत्यपादि-
**"वागर्थाविव शब्दार्थाविव,सम्पृक्तौ नित्यसम्बद्धावित्यर्थः। नित्यसम्बद्धयोरुपमानत्वेनोपादानात् नित्यः शब्दार्थसम्बन्धः" इति (रघुवंशमहाकाव्य-सञ्जीवनीव्याख्या)**
पदवाक्यप्रमाणपारावारीणस्य महाकवेर्भवभूतेर्वचनमप्यत्र मानम्-

**"लौकिकानां हि साधूनामर्थं वागनुवर्तते।**
**ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति॥"**
**(उत्तररामचरितम्-१.१०)**

तत्रापि शब्दार्थज्ञानं विना न कस्यापि जनस्य साधुतया कार्यप्रवृत्तिः।पुनश्च सर्वा अपि अर्थजातयः शब्दाकृतिनिबन्धना एव भवन्ति।न हि कश्चित्पदार्थः किमपि ज्ञानं वा विद्यते यच्छब्दानुविद्धं न भवति।महावैयाकरणेन भर्तृहरिणा तदुक्तम्-

**"न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।**
**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।।"**
**(वाक्यपदीय-१.१३१)**

तदित्थं सिध्यति यदर्थज्ञानं शब्दज्ञानाश्रितं वर्तते।अतः वैयाकरणानां सम्प्रदाये शब्द एव ब्रह्मेति गीयते।शब्दानां महन्महत्त्वं
शास्त्रेषु वर्णितं दृश्यते।तत्रादौ व्याकरणशास्त्रे तदित्थं प्रतिपाद्यते-

**"अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम्।**
**तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते।।"**
**(वाक्यपदीयम्-१.१३)**

काव्यशास्त्रीये काव्यादर्शनामके ग्रन्थे महाकविदण्डिना यथोक्तम्-
**"इदमन्धन्तमः कृत्स्नं जायते भुवनत्रयम्।**

**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते॥"**

**(काव्यादर्शः-१.३)**

मैत्रायण्युपनिषदि ब्रह्मबिन्दूपनिषदि

महाभारतस्य शान्तिपर्वणि च यथोक्तम्-

**"द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत्।**
**शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति।**

**(ब्रह्मबिन्दूपनिषद्-१७,मैत्रायण्युपनिषद्-६.२२,महाभारतम्-१२.२७६ च)**

तदिदं सिध्यति यच्छब्द एवाक्षरब्रह्म परब्रह्म शब्दतत्त्वञ्च निगद्यते। सोऽयं शब्दः नामख्यातपसर्गनिपातभेदेन चतुर्धा विभज्यते।तत्र मानम्-

**"चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताः"**

**इति (महाभाष्यम्)।**

निरुक्तस्य प्रथमाध्याये निरुक्तकारो महामुनिर्यास्कः पुनरिदमाह-

**"तद्यानि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च तानीमानि भवन्ति" इति (निरुक्तम्)।**

पुनस्तत्रैव-

**"सत्वप्रधानानि नामानि,भावप्रधानमाख्यातम्" इति (निरुक्त-प्रथमाध्यायः,प्रथमपादः)**

तथाहि-

**"न निर्बद्धा उपसर्गा अर्थान्निराहुरिति, नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्तीति शाकटायनः (निरुक्तम्-१.३)।**

अस्यायमाशयो यत् चतुर्विधेषु पदजातेषु निरुक्तकृत् शाकटा-यनामक आचार्य उपसर्गाणां स्वतन्त्रार्थं न स्वीकरोति।

असौ उपसर्गाणां वाचकत्वं नैवाङ्गीकरोति अपितु नामाख्यातयोः संसर्गेण उपसर्गाणां द्योतकत्वम् अङ्गीकरोति।अयमेव सिद्धान्तो महामुनेः यास्कस्यापि सम्मतो वर्तते।निरुक्तकारेषु गार्ग्यः मतमिदं नाङ्गीकरोति।निरुक्तकारो गार्ग्य उपसर्गाणां स्वतन्त्रार्थं स्वीकरोति अर्थात् उपसर्गाणां वाचकत्वपक्षं समर्थयति।तत्र मानम्-

**“उच्चावच्चाः पदार्था भवन्तीति गार्ग्यः” इति (निरुक्तम्)।**

तत्र पुनः पदवाक्यप्रामाण्यवादिषु **“यच्छब्दा आह तदस्माकं प्रमाणम्” इति** महाभाष्यकृद्वचनात् पदप्रामाण्यवादिनो वैयाकरणस्य कः सिद्धान्तः

**"उपसर्गाणां द्योतकत्वं वाचकत्वं वा"** इति मनसि जिज्ञासा समुदेति। तत्रादौ चेतसि उपसर्गो नाम किमित्याकाङ्क्षा जागर्ति।अतः

**"उपसर्गाः क्रियायोगे"(अष्टाध्यायी-१/४/५९)** इति पाणिनिसूत्रं स्मर्यते।अस्य सूत्रस्यायमाशयो यद् द्वाविंशतिसङ्ख्यकाः प्रादयः क्रियायोगे उपसर्गसञ्ज्ञां लभन्ते।तदाह-

**"प्रादयः क्रियायोगे उपसर्गसञ्ज्ञाः स्युः।प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति सु उत् अभि प्रति परि उप-एते प्रादयः" इति (सिद्धान्तकौमुदी)।**

वैयाकरणानां नये प्रादीनाम् (उपसर्गाणाम्) स्वतन्त्रः कश्चनार्थो नास्ति।

शाब्दिकनये नैयायिकनये च प्रादयो(उपसर्गाः) द्योतका भवन्तीति तत्तद्ग्रन्थेषु स्फुटम्।वैयाकरणभूषणसारे उपसर्गाणां द्योतकत्वं तदितरनिपातानाञ्च वाचकत्वमिति न्यायमतत्वेन वर्णितम्।तदुक्तं वैयाकरणभूषणकारिकायाम्-

**"प्रादयो द्योतका येन निपाताश्चादयस्तथा"**

**(वैयाकरणभूषणकारिका-४२)**

न्यायमते व्याकरणमते च उपसर्गानां द्योतकत्वमेव।तत्र द्योतकत्वं नाम तात्पर्यग्राहककत्वम्।**"तात्पर्यग्राहकत्वं द्योतकत्वम्"** इत्युक्त-म्।अस्यायं भावः-उपसर्गाणां स्वतन्त्रार्थो न भवति,अपितु ते यदा क्रियया युक्ताः(संयुक्ताः ,सम्बद्धाः) भवन्ति तदा धातुगर्भे सन्निहितानाम् अर्थानां द्योतकाः(प्रकाशकाः) भवन्ति।

उपसर्गशब्द "उप" तथा "सर्गः" इति द्वयोः पदयोर्मेलनेन निष्पद्यते।तत्र उपशब्दस्यार्थः समीपम्(सन्निकृष्टम्) तथा सर्गशब्द-स्यार्थः सृष्टिः। उपसर्गाः स्वतन्त्रतया न कस्यचिदर्थस्य वाचका भवन्ति,अपितु कस्यचित् क्रियाबोधकस्य धातुशब्दस्य समीपे स्थित्वा तस्य नवीनार्थमुद्भावयन्ति,अर्थात्

धातूनामनेकार्थत्वात् धातोरनेकार्थान् प्रकाशयन्तीति भावः।यथा-गृहे बहवः पदार्थाः(वस्तूनि) भवन्ति परं दीपकस्य (प्रकाशस्य) राहित्ये अन्धकारव्याप्तौ च तेषां पदार्थानां सत्ता(विद्यमानता) न प्रतीयते। प्रकाशोद्भवेऽन्धकारनिर्वृत्तौ च यथा गृहे विद्यमानाः सर्वेऽपि पदार्था दृग्गोचरीभवन्ति,तथैव "धातूनामनेकार्थत्वम्" इति

महाभाष्यवचनाद् धातुगर्भेऽनेकार्थाः सन्निहिता भवन्ति,उप-सर्गास्तेषां द्योतकाः तात्पर्यग्राहकाः प्रकाशकाश्च भवन्ति।

**"सति तात्पर्ये सर्वे सर्वार्थवाचकाः"** इति महाभाष्यराद्धान्तोऽपीदं मतं प्रमाणीकरोति।

उपसर्गाणां(प्रादीनाम्) द्योतकत्वे मानम्-

"ईश्वरमनुभवति","अनुभूयते सुखम्" इत्यादिषु स्थलेषु अनुभवादिप्रतीतिर्न धात्वर्थो यतोहि "भवति","भूयते" इत्यादिष्वपि अनुभवाद्यर्थप्रतीतिः स्यात्। अनुभवादिर्नोपसर्गार्थः स्यात्,तत्र अनुभवाद्यर्थस्य अप्रकृत्यर्थतया तत्राख्यातार्थस्य अन्वयापत्तिः स्याद् यतः **"प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वम्"** इति व्युत्पत्ति-स्वीकारात्,तथा "अनुगच्छति","अनुगम्यते" इत्यादिषु स्थलेषु अनुभवादिबोधापत्तिः स्यात्।अनुभवादिर्न विशिष्टार्थः(उपसर्ग-धातूभयसमवेतार्थः,"अनुभू"इति

विशिष्टसमुदायार्थः),विशिष्टशक्तिस्वीकारे गौरवात्।तदुक्तं- **"वि-शिष्टानुपूर्व्याः शक्ततावच्छेदकत्वे विनिगमनाविरहाद् अव्यवहितोत्त-रत्वसम्बन्धेन अनुविशिष्टभूशब्दस्य अव्यवहितपूर्वत्वसम्बन्धेन भूशब्दविशिष्टस्य अनोर्वा वाचकत्वकल्पने गौरवस्य स्पष्टत्वात्।वि-शिष्टस्य प्रकृतित्वाभावेन तदर्थे प्रत्ययार्थान्वयापत्तेश्च।"**

**(वैयाकरणाभूषणसारः,निपातार्थनिर्णयः)**

अतोऽगत्या भूधातोरेव धातूनामनेकार्थस्य सर्वसम्मतत्वेन अनुभवार्थे शक्तिः।अनुरूपोपसर्गस्य च द्योतकत्वम् अङ्गीकर-णीयम्।उपसर्गसञ्ज्ञायाः क्रियायोगे क्रियावाचकधातुत एव द्योत्यार्थ-विशिष्टक्रियाभानम्।

तस्माद् भूधातोरेव विद्यमानत्वादिवाचकस्य अनुभवाद्यर्थे लक्षणास्तु उपसर्गास्तत्र तात्पर्यग्राहका भवन्तु।**"तात्पर्यग्राहकत्वं**

**द्योतकत्वम्"** इति भूषणसारादौ प्रपञ्चितम्।द्योतकत्वलक्षणं तावद् **"द्योतकत्वं नाम स्वसमभिव्याहृतपदनिष्ठवृत्त्युद्बोधकत्वम्।"** तत्र स्वम् द्योतकम् अन्वादिपदम्।तत्समभिव्याहृतम् अर्थात् तत्समीपोच्चारितं पदम् "अनुभूयते" इत्यादौ "भू"आदिपदम्।तन्निष्ठा वृत्तिः अर्थात् शक्तिः अनुभवाद्यर्थनिरूपिता भ्वादौ विद्यमाना शक्तिः।तदुद्बोधकः "अन्वादिः",उद्बोधकत्वम् "अन्वादौ" इति "अनुभूयते" इत्यत्र "अनौ" द्योतकत्वलक्षणं सङ्घटते।

"सुजनः" इत्यादौ क्रियावाचकासमभिव्याहारे उपसर्गत्वाभावाद् वाचकत्वमेव।अतएव "निर्मक्षिकम्"इत्यत्र निरित्यस्य ध्वंसवाचकतया,"उपकुम्भम्" इत्यत्र "उप"इत्यस्य समीपवाचकतया अव्ययीभावसमासः सिध्यति।एवञ्च प्रादीनां स्वरूपद्वयं क्रियायोगवत् क्रियायोगाभाववच्च।

क्रियायोगवत्त्वे प्रादीनामुपसर्गत्वे तेषां द्योतकत्वं,तदभाववत्त्वे च प्रादीनाम् उपसर्गसञ्ज्ञाभावे वाचकत्वमिति केषाञ्चिन्मतं तन्नोचितं यतोहि "सुजनः" इत्यादौ यः स्वादिर्वर्तते वस्तुतः उपसर्गो नास्ति सः,अपितु उपसर्गप्रतिरूपकम् अव्ययम् अस्ति। सिद्धान्तकौमुद्यां दीक्षितेन अव्ययप्रकरणे तत्प्रतिपादितम्-**"उपसर्गविभक्तिस्वरप्रतिरूपकाश्च"** ।

उपसर्गाणाम् अनुभवाद्यर्थवाचकत्वं स्वीक्रियेत चेद् "उपास्येते हरिहरौ","अनुभूयते सुखम्" इत्यादिषु स्थलेषु कर्मणि लकारानापत्तिः स्याद् अर्थात् तत्र कर्मणि लकारो न सिद्ध्येत।तदुक्तं भूषणकारिकायाम्-

**"द्योतकाः प्रादयो येन निपाताश्चादयस्तथा।**
**उपास्येते हरिहरौ लकारो दृश्यते यथा।।"**
**(वैयाकरणभूषणसारः-४२)**

अन्यद्धि-

निरुक्तकारेषु शाब्दिकेषु चाग्रगण्यो विद्वान् शाकटायनाचार्यः **"अर्थविशेषाय उपसृज्यन्ते नामाख्यातयोः समीपे संयोज्यन्त इत्युपसर्गाः"** इति व्युत्पत्त्या "उप" इति निपातपूर्वकात् सृजधातोः घञा प्रत्ययेन उपसर्गशब्दं व्युत्पाद्य

**"न निर्बद्धा उपसर्गा अर्थान्निराहुरिति नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्ति"** इति मतं प्रस्तुत्य उपसर्गाणां द्योतकत्वपक्षं समर्थयति।

पदमञ्जरीकारो हरदत्तमिश्रः **"क्रुधद्रुहोरुपसृष्टयोः कर्म" (अष्टाध्यायी-१.४.३८)** इति सूत्रव्याख्यायां तदेवं ब्रूते-

**"उपसर्गेण सम्बद्धयोरिति।उपसर्गाः क्रियायोगे उपसृजन्तीत्युपसर्गाः,पचाद्यचि न्यङ्क्वादित्वात् कुत्वम्। तेनोपसृष्टयोरित्यस्योपसर्गेण सम्बद्धयोरित्ययमर्थो भवति। स्वनिकायप्रसिद्धिर्वा"** इति (पदमञ्जरी)।

अन्यत्र चोक्तम्-

**"क्रियावाचकमाख्यातमुपसर्गो विशेषकृत्" इति (ऋक्प्रातिशाख्यम्)**।

अस्यायभिप्रायो यद् क्रियावाचकं पदम् आख्यातम् (धातुः) उच्यते।उपसर्गास्तस्य विशेषार्थद्योतका भवन्ति।

तथाहि-

**"प्रातिपदिकार्थयुक्तं धात्वर्थमुपसृजन्ति ये स्वार्थैः।**
**उपसर्गा उपदिष्टास्तस्मान् संस्कारशास्त्रेऽस्मिन्।।"**
**(नाट्यशास्त्रम्)**

पुनश्च-

**"आख्यातमुपगृह्यार्थविशेषमिमे तस्यैव सृजन्तीत्युपसर्गाः" इति (निरुक्तटीका दुर्गवृत्तिः-१.३)।**

अन्यत्र चोक्तम्-

**"उपेत्य नामाख्यातयोरर्थस्य विशेषं सृजन्त्युत्पादयन्ति इत्युपसर्गाः"** इति।

शौनककृत-बृहद्देवताग्रन्थोऽप्यत्र मानम्-

**"निपाताश्चादयो ज्ञेयाः उपसर्गास्तु प्रादयः।**
**द्योतकत्वात् क्रियायोगे लोकादवगता इमे।।"**
**उपसर्गास्तु विज्ञेयाः क्रियायोगेन विंशतिः।**
**विवेचयन्ति ते ह्यर्थं नामाख्यातविभक्तिषु॥**
**(शौनकरचित-बृहद्देवता)**

महाकविमाघविरचितस्य शिशुपालवधमहाकाव्यस्य पण्डितकविमाघवचनमप्यत्र प्रमाणम्-

**"सन्तमेव चिरमप्रकृतत्वादप्रकाशितमदिद्युतदङ्गे।**
**विभ्रमं मधुमदः प्रमदानां धातुलीनमुपसर्ग इवार्थम्॥"**
**(शिशुपालवधम् १०.१५)**

अस्य माघकाव्यश्लोकस्य चतुर्थे चरणे **"धातुलीनमुपसर्ग इवार्थम्"** इति वचनस्यायमाशयो यत् धातुलीनम्(धातुगर्भसन्निहित) अर्थान् उपसर्गः प्रकाशयति द्योतयन्तीति भावः

तदित्थम् उपर्युक्तविवेचनेन निकृष्टतयेदं सिद्ध्यति यद् उपसर्गाणां द्योतकत्वमेवेति शम्।